# Gostotram

# ગોસ્તોત્રં

## Document Information

Text title : Gostotram 1 from Bhavishyapurana

File name : gostotrambhaviShya.itx

Category : devii, devI, otherforms

Location : doc_devii

Transliterated by : Sudeep Dalbanjan

Proofread by : Sudeep Dalbanjan

Description/comments : bhaviShyapurANa | uttaraparva | adhyAya 69/16-24||

Latest update : August 25, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 25, 2024

*sanskritdocuments.org*

# ગોસ્તોત્રં

ક્ષીરોદતોયસમ્ભૂતા યાઃ પુરામૃતમન્થને ।
પઞ્ચગાદઃ શુભાઃ પાર્થ પઞ્ચલોકસ્યમાતરઃ ॥ ૧॥

નન્દા સુભદ્રા સુરભિઃ સુશીલા બહુલા ઇતિ ।
એતા લોકોપકારાય દેવાનાં તર્પણાય ચ ॥ ૨॥

જમદગ્નિભરદ્વાજવસિષ્ઠાસિતગૌતમઃ ।
જગૃહુઃ કામદાઃ પઞ્ચ ગાવો દત્તાઃ સુરૈસ્તતઃ ॥ ૩॥

ગોમયં રોચના મૂત્રં ક્ષીરં દધિ ઘૃતં ગવામ્ ।
ષડઙ્ગાનિ પવિત્રાણિ સંશુદ્ધિકરણાનિ ચ ॥ ૪॥

ગોમયાદુત્થિતઃ શ્રીમાન્ બિલ્વવૃક્ષઃ શિવપ્રિયઃ ।
તત્રાસ્તે પદ્મહસ્તા શ્રીઃ શ્રીવૃક્ષસ્તેન સ સ્મૃતઃ ॥ ૫॥

બીજાન્યુત્પલપદ્માનાં પુનર્જાતાનિ ગોમયાત્ ।
ગોરોચના ચ માઙ્ગલ્યા પવિત્રા સર્વસાધિકા ॥ ૬॥

ગોમૂત્રાદ્ ગુગ્ગુલુર્જાતઃ સુગન્ધિઃ પ્રિયદર્શનઃ ।
આહારઃ સર્વદેવાનાં શિવસ્ય ચ વિશેષતઃ ॥ ૭॥

યદ્બીજં જગતઃ કિઞ્ચિત્ તજ્જ્ઞેયં ક્ષીરસમ્ભવમ્ ।
દધિજાતાનિ સર્વાણિ મઙ્ગલાન્યર્થસિદ્ધયે ॥ ૮॥

ઘૃતાદમૃતમુત્પન્નં દેવાનાં તૃપ્તિકારણમ્ ।
બ્રાહ્મણશ્ચૈવ ગાવશ્ચ કુલમેકં દ્વિધા કૃતમ્ ॥ ૯॥

એકત્ર મન્ત્રાસ્તિષ્ઠન્તિ હવિરન્યત્ર તિષ્ઠતિ ।
ગોષુ યજ્ઞાઃ પ્રવર્તન્તે ગોષુ દેવાઃ પ્રતિષ્ઠિતાઃ ।
ગોષુ વેદાઃ સમુત્કીર્ણાઃ સષડઙ્ગપદક્રમાઃ ॥ ૧૦॥

ઇતિ શ્રી ભવિષ્યપુરાણાન્તર્ગતં ગોસ્તોત્રં સમાપ્તમ્ ॥

ભવિષ્યપુરાણ । ઉત્તરપર્વ । અધ્યાય ૬૯/૧૬-૨૪॥

bhaviShyapurANa . uttaraparva . adhyAya 69/16-24..

Encoded and proofread by Sudeep Dalbanjan

*Gostotram*

pdf was typeset on August 25, 2024

Please send corrections to *sanskrit@cheerful.com*